यः कर्णांजलिसंपुटैरहरहः सम्यक्पिब
त्यादराद्वाल्मीकेर्वदनारविंदगलितं रा
मायणाख्यं मधु ॥ जन्मव्याधिजरा
विपत्तिमरणैरत्यंतसोपद्रवं संसारं स
विहाय गच्छति पुमान्विष्णोः पदं
साश्वतम् ॥ १२ ॥ तदुपगतसमाससंधि
योगं सममधुरोपनतार्थवाक्यबद्धम् ॥
रघुवरचरितं मुनिप्रणीतं दशशिरस

श्व·वधं निशामयध्वम् ॥ १३ ॥ यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकांजलिम् ॥ बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसांतकम्॥१४॥ वाल्मीकिगिरिसंभूता रामसागरगामिनी ॥ पुनातु भुवनं पुण्या रामायणमहानदी ॥ १५ ॥ जितं भगवता तेन हरिणा लोकधारिणा ॥ अजेन विश्वरू

पेण निर्गुणेन गुणात्मना ॥ १६ ॥ तपः
स्वाध्यायनिरतं तपस्वी वाग्विदां वर
म् ॥ नारदं परिपप्रच्छ वाल्मीकिर्मुनि
पुंगवम् ॥ १७ ॥ कोन्वस्मिन्सांप्रतं
लोके गुणवान्कश्च वीर्यवान् ॥ धर्म
ज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥
॥ १८ ॥ चारित्रेण च को युक्तः सर्वभू
तेषु को हितः ॥ विद्वान्कः कः समर्थश्च

कश्चैकः प्रियदर्शनः ॥ १९ ॥ आत्मवान्को जितक्रोधो द्युतिमान्कोनसूयकः ॥ कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥ २० ॥ एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ॥ महर्षे त्वं समर्थोसि ज्ञातुमेवंविधं नरम् ॥ २१ ॥ श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ॥ श्रूयतामिति चामंत्र्य प्रहृष्टो वाक्य

मब्रवीत् ॥ २२ ॥ बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः ॥ मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥ २३ ॥ इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ॥ नियतात्मा महावीर्यो द्युतिमान्धृतिमान्वशी ॥ २४ ॥ बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्छत्रुनिबर्हणः ॥ विपुलांसो महाबाहुः कंबुग्रीवो महाह

नुः ॥ २५ ॥ महोरस्को महेष्वासो गूढजत्रुरारिंदमः ॥ आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥२६ ॥ समः समविभक्तांगः स्निग्धवर्णः प्रतापवान् ॥ पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥२७ ॥ धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः ॥ यशस्वीज्ञानसंपन्नः शुचिर्वश्यः समाधिमान् ॥२८॥

प्रजापतिसमः श्रीमान्धाता रिपुनि
षूदनः ॥ रक्षिता जीवलोकस्य धर्मस्य
परिरक्षिता ॥ २९ ॥ रक्षिता स्वस्य
धर्मस्य स्वजनस्य च रक्षिता ॥ वेदवेदां
गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ ३० ॥
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान्प्रति
भानवान् ॥ सर्वलोकप्रियः साधुरदी
नात्मा विचक्षणः ॥ ३१ ॥ सर्वदाऽभि

गतः सद्भिः समुद्र इव सिंधुभिः ॥ आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥ ॥ ३२ ॥ स च सर्वगुणोपेतः कौसल्याऽनंदवर्द्धनः ॥ समुद्र इव गांभीर्ये धैर्येण हिमवानिव ॥ ३३ ॥ विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः ॥ कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥ ॥ ३४ ॥ धनदेन समस्त्यागे सत्ये धर्म

इवापरः ॥ तमेवंगुणसंपन्नं रामं सत्य
पराक्रमम् ॥ ३५ ॥ ज्येष्ठं श्रेष्ठगुणैर्युक्तं
प्रियं दशरथः सुतम् ॥ प्रकृतीनां हितैर्यु
क्तं प्रकृतिप्रियकाम्यया ॥ ३६ ॥ यौ
वराज्येन संयोक्तुमैच्छत्प्रीत्या महीप
तिः ॥ तस्याभिषेकसंभारान्दृष्ट्वा भा
र्यांथ कैकयी ॥ ३७ ॥ पूर्वं दत्तवरा दे
वी वरमेनमयाचत ॥ विवासनं च रा

मस्य भरतस्याभिषेचनम् ॥ ३८ ॥ स सत्यवचनाद्राजा धर्मपाशेन संयतः ॥ विवासयामास सुतं रामं दशरथप्रियम् ॥ ३९ ॥ स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ॥ पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात् ॥ ४० ॥ तं व्रजंतं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ॥ स्नेहाद्विनयसंपन्नः सुमित्रानं

दवर्द्धनः ॥ ४१ ॥ भ्रातरं दयितो भ्रातुः
सौभ्रात्रमनुदर्शयन् ॥ रामस्य दयिता
भार्या नित्यं प्राणसमा हिता ॥ ४२ ॥
जनकस्य कुले जाता देवमायेव निर्मि
ता ॥ सर्वलक्षणसम्पन्ना नारीणामुत्त
मा वधूः ॥ ४३ ॥ सीताप्यनुगता रामं
शशिनं रोहिणी यथा ॥ पौरैरनुगतो दूरं
पित्रा दशरथेन च ॥ ४४ ॥ शृंगवेरपुरे

सूतं गंगाकूले व्यसर्जयत् ॥ गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ ॥४५॥ गुहेन सहितो रामो लक्ष्मणेन च सीतया ॥ ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥ ४६ ॥ चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ॥ रम्यमावसथं कृत्वा रममाणा वने त्रयः ॥ ॥ ४७ ॥ देवगंधर्वसंकाशास्तत्र ते न्यव

सन् सुखम् ॥ चित्रकूटं गते रामे पुत्र
शोकातुरस्तदा ॥ ४८ ॥ राजा दशरथः
स्वर्गं जगाम विलपन्सुतम् ॥ गते तु
तस्मिन्भरतो वसिष्ठप्रमुखैर्द्विजैः ॥
॥ ४९ ॥ नियुज्यमानो राज्याय नैच्छ
द्राज्यं महाबलः ॥ स जगाम वनं वीरो
रामपादप्रसादकः ॥ ५० ॥ गत्वा तु सुम
हात्मानं रामं सत्यपराक्रमम् ॥ अया

वद् भ्रातरं राममार्यभावपुरस्कृतः ॥
॥ ५१ ॥ त्वमेव राजा धर्मज्ञ इति रामं व
चोब्रवीत् ॥ रामोपि परमोदारः सुमुखः
सुमहायशाः ॥ ५२ ॥ न चैच्छात्पितु
रादेशाद्राज्यं रामो महाबलः ॥ पादुके
चास्य राज्याय न्यासं दत्त्वा पुनः पुनः
॥ ५३ ॥ निवर्तयामास ततो भरतं भर
ताग्रजः ॥ स काममनवाप्यैव राम

पादावुपस्पृशन् ॥ ५४ ॥ नंदिग्रामेऽकरोद्राज्यं रामागमनकांक्षया ॥ गते तु भरते श्रीमान्सत्यसंधो जितेंद्रियः ॥ ॥ ५५ ॥ रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ॥ तत्रागमनमेकाग्रो दंडकान्प्रविवेश ह ॥ ५६ ॥ प्रविश्य तु महारण्यं रामो राजीवलोचनः ॥ विराधं राक्षसं हत्वा शरभंगं ददर्श ह ॥ ५७ ॥ सु

तीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रात
रं तथा ॥ अगस्त्यवचनाच्चैव जग्राहैंद्रं
शरासनम् ॥ ५८॥ खड्गं च परमप्रीत
स्तूणी चाक्षय्यसायकौ ॥ वसतस्त
स्य रामस्य वने वनचरैः सह ॥ ५९ ॥
ऋषयोऽभ्यागमन्सर्वे वधायासुरराक्षसा
म् ॥ स तेषां प्रतिशुश्राव राक्षसानां त
दा वने ॥ ६० ॥ प्रतिज्ञातश्च रामेण

वधः संयति रक्षसाम् ॥ ऋषीणामग्निक
ल्पानां दंडकारण्यवासिनाम् ॥ ६१ ॥
तेन तत्रैव वसता जनस्थाननिवासि
नी ॥ विरूपिता शूर्पणखा राक्षसी का
मरूपिणी ॥ ६२ ॥ ततः शूर्पणखावा
क्यादुद्युक्तान्सर्वराक्षसान् ॥ खरं त्रि
शिरसं चैव दूषणं चैव राक्षसम्
॥ ६३ ॥ निजघान रणे रामस्तेषां

चैव पदानुगान् ॥ वने तस्मिन्निवसता जनस्थाननिवासिनाम् ॥ ६४ ॥ रक्षसां निहतान्यासन्सहस्राणि चतुर्दश ॥ ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः ॥ ६५ ॥ सहायं वरयामास मारीचं नाम राक्षसम् ॥ वार्यमाणः सबहुशो मारीचेन स रावणः ॥ ६६ ॥ न विरोधो बलवताक्षमो रावण तेन ते ॥

अनाहृत्य तु तद्वाक्यं रावणः कालचोदितः ॥ ६७ ॥ जगाम सहमारीचस्तस्याश्रमपदं तदा ॥ तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥ ६८ ॥ जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम् ॥ गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् ॥ ६९ ॥ राघवः शोकसंतप्तो विललापाकुलेंद्रियः ॥ ततस्तेनैव शो

केन गृध्रं दग्ध्वा जटायुषम् ॥ ७० ॥
मार्गमाणो वने सीतां राक्षसं संददर्श
ह ॥ कबंधं नाम रूपेण विकृतं घोरद
र्शनम् ॥७१ ॥ तं निहत्य महाबाहुर्ददा
ह स्वर्गतश्च सः ॥ स चास्मै कथयामा
स शबरीं धर्मचारिणीम् ॥ ७२ ॥ श्रम
णां धर्मनिपुणामभिगच्छेति राघव ॥
सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसू

दनः ॥७३॥ शबर्या पूजितः सम्यग्रामो दशरथात्मजः ॥ पंपातीरे हनुमता संगतो वानरेण ह ॥ ७४ ॥ हनुमद्वचनाच्चैव सुग्रीवेण समागतः ॥ सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ॥ ॥ ७५ ॥ आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः ॥ सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥ ७६ ॥ चकार

सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ॥
ततो वानरराजेन वैरानुकथनं प्रति ॥
॥ ७७ ॥ रामायावेदितं सर्वं प्रणयाद्दुः
खितेन च ॥ प्रतिज्ञातं च रामेण तदा
वालिवधं प्रति ॥ ७८ ॥ वालिनश्च बलं
तत्र कथयामास वानरः ॥ सुग्रीवः
शंकितश्चासीन्नित्यं वीर्येण राघवे
॥ ७९ ॥ राघवप्रत्ययार्थं तु दुंदुभेः का

यमुत्तमम् ॥ दर्शयामास सुग्रीवो महापर्वतसन्निभम् ॥ ८० ॥ उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ॥ पादांगुष्ठेन चिक्षेप संपूर्णं दशयोजनम् ॥ ८१ ॥ बिभेद च पुनस्तालान्सप्तैकेन महेषुणा ॥ गिरिं रसातलं चैव जनयन्प्रत्ययं तदा ॥ ८२ ॥ ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ॥

किष्किंधां रामसहितो जगाम च गुहां तदा ॥ ८३ ॥ ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिंगलः ॥ तेन नादेन महता निर्जगाम हरीश्वरः ॥ ८४ ॥ अनुमान्य तदा तारां सुग्रीवेण समागतः ॥ निजघान च तत्रैव शरेणैकेन राघवः ॥ ॥ ८५ ॥ ततः सुग्रीववचनाद्धत्वा वालिनमाहवे ॥ सुग्रीवमेव तद्राज्ये राघ

व: प्रत्यपादयत् ॥ ८६ ॥ स च सर्वा
न्समानीय वानरान् वानरर्षभः ॥ दि
शः प्रस्थापयामास दिदृक्षुर्जनकात्म
जाम् ॥ ८७ ॥ ततो गृध्रस्य वचनात्सं
पातेर्हनुमान् बली ॥ शतयोजनवि
स्तीर्णं पुप्लुवे लवणार्णवम् ॥ ८८ ॥ त
त्र लंकां समासाद्य पुरीं रावणपालि
ताम् ॥ ददर्श सीतां ध्यायंतीमशोक

वनिकागताम् ॥ ८९ ॥ निवेदयित्वा
ऽभिज्ञानं प्रवृत्तिं विनिवेद्य च ॥ समा
श्वास्य च वैदेहीं मर्दयामास तोरणम् ॥
॥ ९० ॥ पञ्च सेनाग्रगान् हत्वा सप्त मं
त्रिसुतानपि ॥ शूरमक्षं च निष्पिष्य ग्र
हणं समुपागमत् ॥ ९१ ॥ अस्त्रेणोन्मु
क्तमात्मानं ज्ञात्वा पैतामहाद्वरात् ॥ मं
र्षयन् राक्षसान्वीरो मंत्रिणस्तान् यह

च्छया ॥९२ ॥ ततो दग्ध्वा पुरीं लंकामृते सीतां च मैथिलीम् ॥ रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥ ॥ ९३ ॥ सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ॥ न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥ ९४॥ ततः सुग्रीवसहितो गत्वा तीरं महोदधेः॥समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥

॥ ९५ ॥ दर्शयामास चात्मानं समुद्रः
सरितां पतिः ॥ समुद्रवचनाच्चैव नलं
सेतमकारयत् ॥ ९६ ॥ तेन गत्वा पुरीं
लंकां हत्वा रावणमाहवे ॥ रामः सीता
मनुप्राप्य परां व्रीडामुपागमत् ॥ ९७ ॥
तामुवाच ततो रामः परुषं जनसंसदि ॥
अमृष्यमाणा सा सीता विवेश ज्व
लनं सती ॥ ९८ ॥ ततोग्निवचनात्सी

तां ज्ञात्वा विगतकल्मषाम् ॥ कर्मणा
तेन महता त्रैलोक्यं सचराचरम् ॥
॥ ९९ ॥ सदेवर्षिगणं तुष्टं राघवस्य म
हात्मनः ॥ बभौ रामः संप्रहृष्टः पूजि
तः सर्वदैवतैः ॥ १००॥ अभिषिच्य च
लंकायां राक्षसेंद्रं विभीषणम् ॥ कृतकृ
त्यस्तदा रामो विज्वरः प्रमुमोद ह॥ १॥
देवताभ्यो वरं प्राप्य समुत्थाप्य च वान

रान् ॥ अयोध्यां प्रस्थितो रामः पुष्पके
ण सुहृद्वृतः ॥२॥ भरद्वाजाश्रमं गत्वा
रामःसत्यपराक्रमः ॥भरतस्यांतिके रा
मोहनूमंतं व्यसर्जयत् ।३॥पुनराख्यायि
कां जल्पन्सुग्रीवसहितस्तदा ॥ पुष्पकं
तत्समारुह्य नंदिग्रामं ययौ तदा॥४॥
नंदिग्रामे जटां हित्वा भ्रातृभिः सहि
तोनघः ॥ रामः सीतामनुप्राप्य राज्यं

पुनरवाप्तवान् ॥५॥ हृष्टः प्रमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः ॥ निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥ ६ ॥ न पुत्रमरणं केचिद्द्रक्ष्यंति पुरुषाः क्वचित् ॥ नार्यश्चाविधवा नित्यं भविष्यंति पतिव्रताः ॥ ७ ॥ न चाग्निजं भयं किंचिन्नाप्सु मज्जंति जंतवः ॥ न वातजं भयं किंचिन्नापि

ज्वरकृतं तथा ॥ ८ ॥ न चापि क्षुद्भयं तत्र न तस्करभयं तथा ॥ नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥ ९ ॥ नित्यं प्रमुदिताः सर्वै यथाकृतयुगे तथा ॥ अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ ११० ॥ गवां कोटचयुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम् ॥ असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥ ११ ॥

राजवंशाञ्छतगुणान्स्थापयिष्यति राघवः ॥ चातुर्वर्ण्यं च लोकेस्मिन्स्वेस्वे धर्मे नियोक्ष्यति॥ १२ ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥ रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति॥१३॥ इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम्॥यः पठेद्रामचरितं सर्वपापैःप्रमुच्यते॥१४॥ एतदाख्यानमायुष्यं पठन्रामायणं न

र:।। सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे मही
यते ।। १५ पठन्द्विजो वागृषभत्वमी
यात्स्यात्क्षत्त्रियो भूमिपतित्वमीयात्।
वणिग्जनः पुण्यफलत्वमीयाज्जनश्च शू
द्रोपि महत्त्वमीयात् ।। १६ ।। चरितं रघु
नाथस्य शतकोटिप्रविस्तरम् ।। एकैक
मक्षरंपुंसांमहापातकनाशनम्।।१७।।रा
माय रामभद्राय रामचन्द्रायवेधसे। रघु